National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2026;** 1(64): 104-107
© 2026 NJHSR
www.sanskritarticle.com

**खेमराजः**
शोधच्छात्रः,
संस्कृतपालिप्राकृतविभागः,
हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः,
धर्मशाला

**Correspondence:**
**खेमराजः**
शोधच्छात्रः,
संस्कृतपालिप्राकृतविभागः,
हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः,
धर्मशाला

# संस्कृतवाङ्मयसहितश्रीमद्भागवताग्निमहापुराणयोः मोक्षप्राप्तये अष्टसिद्धीनामनुशीलनम्

**खेमराजः**

**सारांशः**

संस्कृतवाङ्मये दर्शनशास्त्रे, सम्पूर्णवाङ्मये विशेषरूपेण आध्यात्मिकक्षेत्रे सिद्धीनां विशिष्टस्थानं सर्वोपरि, सर्वोत्कृष्टं सर्वोत्तमञ्च स्वीक्रियते। यद्यपि सर्वशास्त्रेषु सिद्धीनां वर्णनं प्रत्यक्षपरोक्षरूपेण विद्यत एव। यत्र व्याकरणशास्त्रे सिद्धिः, साधकः, साधनञ्चेत्यादीनां शब्दानां समावेशो विद्यते तथा हि ज्योतिषशास्त्रे गूढगहनफलादेशार्थम् इष्टदेवसिद्धिर्विषयकनिर्देशः प्रदीयते आचार्यैः, गुरुवर्य्यैः, ज्योतिषज्ञैश्च। सम्पूर्णदर्शनशास्त्रन्तु ब्रह्मविषयकजपसिद्धिध्यानावाहनादिभिः परिपूरितमस्ति। वेदेषु चापि सिद्धिविषयकज्ञानं विशदवर्णनेन प्रतिपादितमस्ति।

**कूटशब्दाः**

श्रीमद्भागवतमहापुराणम्, अष्टसिद्धयः, पुराणम्, मोक्षः, वेदः, वैदिकसंस्कृतिः, जीवगतयः इत्यादयः।

**उद्देश्यानि**

क. अस्याध्ययनेन श्रीमद्भागवतमहापुराणस्य सिद्धीनां समीक्षणविषये ज्ञास्यामः।

ख. अस्याध्ययनेन अग्निमहापुराणस्य सिद्धीनां समीक्षणविषये ज्ञास्यामः।

ग. अस्याध्ययनेन श्रीमद्भागवताग्निमहापुराणयोः वर्णितसाम्यसिद्धीनां विषये ज्ञास्यामः।

घ. अस्याध्ययनेन विविधधर्मशास्त्रेषु वर्णितसिद्धिविषयकचर्चायाः विषये ज्ञास्यामः।

ङ. वर्तमानपरिप्रेक्ष्ये उभयोः महापुराणयोः प्रासङ्गिकतायाः विषये ज्ञास्यामः।

**प्रस्तावना**

वैदिकपरम्परानन्तरं महापुराणानां स्थानं भजते। यद्यपि अद्यत्वे तु उपपुराणान्यपि प्रतिपादितानि सन्ति। तत्र सिद्धिज्ञानात् श्रुतिस्मृतिशास्त्राण्यपि अस्पर्शतायाः नातिदूरे प्रवर्तते। यदि पुराणेषु तु वेदादप्यधिकतया सिद्धीनां विषयकचर्चा विस्तरेण विद्यते। महापुराणेषु सर्वप्रथमरूपेण यथा आदिपुराणरूपेण मत्स्यमहापुराणस्य नामायाति तथैव विश्वकोषरूपेणाग्निमहापुराणस्य विशिष्टस्थानं विद्यते। ततश्चान्तिमे लोकसुप्रसिद्धमहापुराणे श्रीमद्भागवतमहापुराणेऽपि सिद्धिविषयकज्ञानस्य चर्चा विद्यत इति। अत्रापि सिद्धीनां विषयेऽहमुभयोः महापुराणयोः वर्णितानां सर्वसिद्धीनां विषये अत्र किञ्चित्सूक्ष्मरीत्या यत्किमपि ज्ञानं सम्प्राप्यते, तस्मिन् विषये अत्रापि चर्चा भविष्यति । अनेकधर्मशास्त्रेषु अष्टसिद्धीनां विषये उक्तवन्त सन्ति आचार्यैः। मार्कण्डेयमहापुराणे न केवलमष्टसिद्धीनां विषये अपितु तासां लक्षणान्यपि उक्तानि सन्ति[1]। परञ्चात्र समेषाम्मतेऽष्टसिद्धयः प्राधान्यं भजते । अष्टसिद्धीनां विषये सङ्क्षिप्तरूपेणात्रेत्थं सम्प्राप्यते

**अणिमासिद्धिः**

प्रथमसिद्धिरूपेण अणिमासिद्धेः स्थानं विद्यते। अनया अणिमासिद्धिद्वारा अणुपरमाणुतः सूक्ष्माकारं स्वीकर्तुं शक्यते, अष्टसिद्धिषु प्रथमा सिद्धिः 'अणिमा' इत्यङ्गीक्रियते। अनया सिद्धिद्वारा साधको योगी वा स्थूलाकारात्सूक्ष्माकारे परिवर्तनं कर्तुं समर्थो भवति। ब्रह्मवैवर्तमहापुराणानुसारं भगवतीगङ्गाद्वारा स्वविशालकायस्वरूपात् अत्यन्तसूक्ष्मशरीरे प्रवेशनेन भगवच्छ्री-कृष्णचन्द्रस्य पदपङ्कजेषु समर्पणमिति **'अणिमासिद्धिः'** इत्याख्यशक्तेः सिद्धेर्वा उदाहरणमस्ति[2] ।

वाल्मीकीयरामायणे भगवता हनुमता अणुरूपं धृत्वा लङ्काप्रवेशस्य वर्णनं तथा श्रीमता भगवद्वेदव्यासेन विरचिते श्रीमद्भागवतमहापुराणमित्याख्ये ग्रन्थे श्रीकृष्णद्वारा स्वयोगमायया स्वपित्रोः समक्षं शीघ्रमेव साधारणशिशुरूपं धारणस्य वर्णनं वर्णितमस्ति, यथा

**इत्युक्त्वाऽऽसीद्धरिस्तूष्णीं भगवानात्ममायया।**
**आ पित्रोः सम्पश्यतोः सद्यो बभूव प्राकृतः शिशुः[3]॥**

श्रीमद्भागवतमहापुराणस्यैकादशस्कन्धस्य पञ्चदशाध्याये भगवान् श्रीकृष्णचन्द्रः उद्धवं योगधारणाद्वारा सम्प्राप्तसिद्धीनां विषये वदति यत् "हे उद्धव! पञ्चमहाभूतानामत्यन्तसूक्ष्मतममात्राः परमात्मनः एव शरीररूपं वर्तते। यः कोऽपि साधकः परमात्मानः तस्य सूक्ष्मतमशरीरस्योपासना साधना वा करोति, साधनाबलेन स साधकः स्वेन्द्रियमनोबुद्धीत्यादिभिः परमात्मनः ध्यानं निरन्तररूपेण करोति अर्थात् साधकः परमात्मनः तन्मात्रात्मकशरीरादतिरिक्त-मन्यस्य कस्यचिद् वस्तुनः चिन्तनं मनसोऽपि नैव करोति तदा अवस्थायामस्यां साधकः स्वस्वरूपम् अणुरूपेण परिणितुं सामर्थ्यं सम्प्राप्नोति । अनया साधनया स सर्वप्रथममणिमासिद्धिं प्राप्नोति। इत्थं स अणिमासिद्धिं सम्प्राप्य पाषाणेऽपि प्रवेशं कर्तुं समर्थो भवति।

**महिमासिद्धिः**

स्वनामसदृशो महिमेतिशब्दस्यार्थो वर्तते। तथापि अस्याः अन्यार्थाः वृहद्, दीर्घकायः विशालकायो वेत्याद्यर्थाः वर्तन्ते । यदि कोऽपि योगी, भक्तः, साधको वा स्वशरीरं स्वसाधनायाः बलेन पर्वतसदृशं विशालकायस्वरूपं प्राप्तुं समर्थो भवति, तदा तं महिमासिद्धेः प्राप्तिर्भवति । सिद्धिरियं शारीरिकबलत्वेन सम्प्राप्यते।

श्रीमद्भागवतमहापुराणे कृष्णजन्मसमये लघुबालकात् स्वीयविरा-टस्वरूपस्य दर्शनं कारयितुं देवकीवसुदेवयोः समक्षं स्वरूपविस्तारे महिमासिद्धेर्विषये उदाहरणमाप्नोति[4]। अग्निमहापुराणे महिमासिद्धेः वर्णनं कुर्वन् अग्निदेवो वसिष्ठं श्रीभगवतः मत्स्यावतारस्य कथां श्रावयन् वदति यद् 'हे वशिष्ठ ! वैवश्वतमनुः 'कृतमाला' इत्याख्यायां नद्यां जलेन तर्पणं करोति स्म, तस्मिन्नेव समये तस्याञ्जलिजले एकः मीनः आगच्छत्। मीनस्य प्रार्थनां श्रुत्वा मुनिना तं मीनं कलशजले स्थापितः। तदा परञ्च सहसा स दीर्घकाययुक्तोऽभवत्। तदा तेन मुनिना पुनः तमेकस्मिन्नन्यदीर्घजलपात्रे तमक्षिपत् । वारं-वारं स दीर्घतामाप्नोत्। तथा चान्ते सरोवरे आगत्य वृद्ध्यर्थं तमक्षिपत् मछलीको। पुनश्च स मीन एकस्मिन्निमेषे लक्षयोजनविस्तृत-शरीरयुक्तोऽभवत्। अग्निमहापुराणे महिमासिद्धेः अनुत्तमोदाहरणमि-दमुपलभ्यते। तस्मिन् विषये श्रीमद्भागवतमहापुराणे पद्यमित्थं प्राप्नोतिलक्षयोजनविस्तीर्णः क्षणमात्रेण सोऽभवत्।

**मत्स्यं तमद्भुतं दृष्ट्वा विस्मितः प्राब्रवीन्मनुः[5]॥**

एतादृश्येव कथा वाल्मीकीयरामायणे सम्प्राप्ताऽस्ति। यदा हनुमता समुद्रलङ्घनसमये सुरसायाः मुखे प्रवेशात् विमोचनाय विशालशरीरो धारितः तदा सुरसयाऽपि अतिविशालो दीर्घकायो वा स्वशरीराकृतिः कृतेति कथा वाल्मीकीयरामायणे वर्णिता वर्तते[6]। तत्र लघुरूपाद्दीर्घाकृतिधारणं पुनश्च दीर्घरूपाल्लघुरूपधारणमिति महिमासिद्धेः उदाहरणानि सन्ति। अपि च भगवता हनुमता लक्ष्मणप्राणरक्षार्थं भावनात्मक असंतुलन से ग्रसित होता जा रहा है। ऐसे समय में प्राण चिकित्सा एक प्रभावशाली सञ्जीवनौषधीं नीतुं स्वशरीराकृतेः दीर्घकायस्वरूपधारणं कृत्वा हिमालयस्थमहत्सु-मेरुपर्वतमुत्थापयितुं महिमासिद्धेः आश्रयग्रहणं कृतम् ।

तथैव भगवता वेदव्यासेनापि स्वकीये महाकाव्ये महाभारते हिडीम्बाभीमसंवादप्रसङ्गे हिडीम्बाद्वारा भीमसेनस्यांशरूपेण उत्पन्नपुत्रेण घटोत्कचेनापि महाभारतस्य महासङ्ग्रामे कर्णबाणद्वाराऽऽघाते प्राप्ते सति मृत्युकालात्पूर्वं महिमासिद्धिद्वारैव विशालरूपधारणेन कौरवसैनिकेषु भयमुत्पादितम् । तथा च पुनः महाभारतस्यांशभूतायां श्रीमद्भगवद्गीतायामपि एकादशतमाध्याये महिमासिद्धिद्वारैव भगवतो विष्णोः विराट्पुरुषरूपधारणस्य प्रसङ्गोऽप्यायाति ।

श्रीमद्भागवतमहापुराणस्याष्टमस्कन्धे भगवद्वामनद्वारा अद्भुत-स्वरूपस्य वर्णनमायाति। भगवतः तत् त्रिगुणात्मकवामनस्वरूपं वृद्धिमाप्नोत्। वामनेन स्वीयेन स्वरूपेण पृथ्वीस्वर्गाकाशदिशापाता-लसमुद्रपशुपक्षीमनुष्यदेवतेत्यादयः सर्वे समाविष्टाः[7]। तेन महिमा-सिद्धिद्वारैकेनैव पादेन भूर्लोकाद्ब्रह्माण्डं यावत्तथा द्वितीयपादेन पातालपर्यन्तं सर्वं पादद्वयपरिमाणेनैवालङ्घयत्[8]।

**बाहून् दशशतं लेभे दुर्धर्षत्वमरातिषु[9]।**

विषयस्यास्य प्रसङ्गस्तु ऋग्वेदस्य दशममण्डले विराट्पुरुषस्य रूपेऽप्यायाति यथा

**त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः ।**
**ततो विराडजायत विराजो अधिपूरुषः[10]॥**

श्रीमद्भागवतमहापुराणस्य दशमस्कन्धेऽपि महिमासिद्धिद्वारा पूतना बृहदाकारः अधारयत्। यदा कृष्णस्यावतारः धराधामोपरि अभवत् तदा कंसेन मृत्युभयात् पुतनां गोकुलग्रामं प्रति गन्तुं निर्देशः अददत् । तदा पुतना कृष्णं हन्तुं गोकुलं प्रत्यगच्छत्।

तत्र गोकुले गत्वा बालकृष्णमुत्थापय अपलायत्तदा स्वस्तनाभ्यां दुग्धपानद्वारा कृष्णहत्यायै कृष्णमुखे प्रवेशकार्यं कृतम्। तदा भगवच्छ्रीकृष्णचन्द्रेण स्वमायया स्तनस्थसम्पूर्णदुग्धपानानन्तरं प्राणानामपि पानं कृतम्। तदा तया पुतनया स्वप्राणरक्षार्थं महिमासिद्धिद्वारा विशालशरीरधारणं कृतम्। तस्याः शरीरो भयानक आसीत्। मुखे च तस्याः हलसदृशविशालदन्ताः हस्ते च दीर्घाकारयुक्तनखाः आसन्। अरुणवर्षीयाः विशालकेशाः आसन् । नेत्रे अन्धकूपसदृशे गहने स्तः, पर्वतसदृशो नितम्बः, विशालभुज-जङ्घापादाश्चासन्।

**लघिमासिद्धिः**

लघिमासिद्धेः वर्णनन्तु महिमासिद्धिमिव वेदमन्त्रेषूपलभ्यते, तद्यथा

**मुनयो वातरशनाः पिशङ्गा वसते मला।**
**वातस्यानु ध्राजिं यन्ति यद् देवासो आविक्षत॥[11]**

अर्थात् ये मुनीत्यादयो वायुरूपरज्जुमिव ग्रह्यन्ते, एतादृशाः योगीमुनिजनाः पिङ्गलवर्णीयकेशान् जटाः स्वशिरसि धरन्ति । यदा तान् दिव्यशक्तयः प्रविशन्ति, तदा ते वायुगतिना सह गगनमण्डले स्वतन्त्ररूपेण भ्रमन्ति । तथैव प्रसङ्गेऽस्मिन् निम्नप्रकारेणाप्युच्यते

क) कायाकाशयोः सम्बन्धसंयमाल्लघुतूल समापत्तेश्चाकाशगमनम्[12] इति।

ख) तत्र कृतसंयमो जित्वा तत्सम्बन्धं लघुषु तूलादिष्वापरमाणुभ्यः समापत्तिं लब्ध्वा जित सम्बन्धो लघुः। लघुत्वाच्च जले पादाभ्यां विहरति, रश्मिषु विहरति, ततो यथेष्टमाकाशगतिस्य भवतीति[13] इति।

भक्तराजतुलसीदासेनापि स्वकीये 'रामचरितमानसमि'त्याख्ये ग्रन्थेऽपि आञ्जनेयद्वारा आकाशगमनविषये उच्यते यत् कस्यचित्स-मुद्रस्य तटे एकः सुन्दरपर्वत आसीत्। तदा तस्मिन्नुपरि तीव्रवेगेन सः अगच्छत्। यथा भगवतः श्रीरामचन्द्रस्यामोघास्त्रं गतिं करोति तथैव भगवत आञ्जेनयोऽपि अगच्छत्। अत्र प्रसङ्गेऽस्मिन् भगवता आञ्जनेयेनातीवलघुरूपेण महत्कार्यं कृत्वा स्वेच्छानुसारं लघिमा-सिद्धिद्वारैव साधितम्।

**प्राप्तिसिद्धिः**

सिद्धिरियमिन्द्रियाणां महासिद्धिरित्युच्यते। महर्षिकर्दममुनिना स्वप्रियायाः धर्मपत्न्याः इच्छापूर्तये तस्मिन्नेव क्षणे योगबलद्वारा 'कामगविमानम्' इत्याख्यस्य महदद्भूतविमानञ्चकार। विमान-स्यास्य महत्त्वपूर्णा विशेषतेयमासीत् यद्विमानमिदमिच्छानुसारं सर्वत्र गन्तुं शक्नोति स्म। विमानमिदं सर्वप्रकारकेच्छितभोगो-पभोगसुखादीनां प्रदायकम्, अत्यन्तसुन्दरम्, सर्वविधरत्नाभूषणैः संयुक्तम्, सर्वसम्पत्तिसूत्तरोत्तरवृद्धिप्रदायकं तथा विविधमणियुक्त-स्थाणुभिः सुशोभितमासीत्। प्रसङ्गोऽयमपि भगवता श्रीवेदव्यासे-नैव महाभारते तथा श्रीमद्भागवतमहापुराणस्य चतुर्थस्कन्धे वर्णितोऽस्ति। तद्यथा

**प्रियायाः प्रियमन्विच्छन् कर्दमो योगमास्थितः।**
**विमानं कामगं क्षत्तस्तह्यवाविरचीकरत्॥**[14]

प्राप्तिसिद्धिद्वारैव साधक इच्छितवस्तु शीघ्रमेव प्राप्तुं क्षमताप्राप्तिर्भवति। साधक इच्छितवस्तु वायुत एव प्राप्तुं शक्नोतीति एतादृशी क्षमता विभिन्नदेवराक्षसादीनां पार्श्वे आसीत्। भक्तं भक्तिप्राप्तिः, इन्द्रं स्ववज्रप्राप्तिः, महादेवं स्वत्रिशूलप्राप्तिः, भगव-द्विष्णुं सुदर्शनचक्रप्राप्तिः, रावणं दशाननप्राप्तिः, दानवराजसहस्त्रार्जुनं सहस्त्रभुजानां प्राप्तिश्चेति स्वीयतपोबलद्वारैवालभन्। प्राप्तिसिद्धिद्वारा योगी स्वेच्छानुसारमेव एकस्माल्लोकात् अपरग्रहोपग्रहसूर्यचन्द्रा-दीलोकान् प्रत्यगमनस्य क्षमता प्राप्नोति।

**ईशितासिद्धिः**

भगवत ईशितासिद्धेः ऐश्वर्यसिद्धेः वर्णनं श्रीमद्भागवत-महापुराणस्य दशमस्कन्धस्य षड्विंशतमाध्याये सङ्क्षिप्तरूपेण समुपलभ्यते। तत्र कथाप्रसङ्गानुसारमेकवर्षीयबालकेन श्रीकृष्णेन 'पूतना' 'वकीः' वा इत्याख्यायाः असुरायाः स्तनपानानन्तरं प्राणपानेन वधः, 'तृणावर्तः' इत्याख्यासुरस्य वधः, महत्कृष्ण-सर्पमदमर्दनमकरोत्। तथा च यदा श्रीकृष्णचन्द्रेण सप्तवर्ष-वयोबालकेन 'गोवर्धनगिरिराजः' इत्याख्य-पर्वतं स्वीयकनिष्ठिकायां सप्तदिनानि यावत् अधारयत्। स्वगुरुसन्दीपनीमुनेः मृतपुत्रं यमराजात् पुनः प्राप्य नूतन-जीवनदानमपि अकारयत्। एतादृशानि अद्भुतालौकिककार्याणि स्वयं प्रभुः एव कर्तुं शक्नोति अर्थात् भगवान् श्रीकृष्णचन्द्रः स्वयमेव 'ईश्वरः' इत्यासीत्।

भगवच्छिवद्वारा समुद्रमन्थनसमये सर्वप्रथमतया प्राप्तविषस्य पानं कृत्वा स्वेशित्वसिद्धिद्वारा कालकूटहालाहलस्य भक्षणमकरोत्[15]। एतादृशानि दिव्यकार्याणि केवलं ईशित्वसिद्धेः साधक एव कर्तुं समर्थो भवति। ईशितासिद्धेः गुणानुसारं साधके इच्छानुसारं प्रकृतिं प्रभावितं कर्तुं क्षमता प्राप्नोति। मायां तथा च तदंशभूतान्यशक्तीन् प्रेरणाप्रदायित्री सिद्धिः प्रवर्तते।

पृथ्वी भगवत इच्छानुसारमेव प्रचलति, गगनमण्डलमपि तस्यैव इच्छानुसारं वर्षारूपेण जलप्रदानं करोति तथा च वायुरपि तस्यैव इच्छानुसारं प्रवहति। प्रत्येका प्राकृतिकघटना ईशत्वसिद्धिद्वारा अथवा भगवत इच्छानुसारमेव सफलीभूता भवति। विभिन्नजनेषु ऋषिमुनिसाधुषु एतादृशी ईश्वरीयशक्तिः आसीत्, ते शीघ्रमेव वृक्षाणामुत्पादनं कर्तुं, वर्षणं कर्तुं, पर्वतारोहणं कर्तुं, भस्मीभूतः कर्तुञ्च समर्था भवन्ति स्म।

अस्याः सिद्धेः प्रभावेनैव श्रीमद्भागवतमहापुराणस्य प्रथमस्कन्धे प्रसङ्गानुसारं योगेश्वरश्रीकृष्णचन्द्रस्य सुदर्शनचक्रेण समक्षममोघ-ब्रह्मास्त्रमपि निस्तेजं कृत्वा परीक्षितस्य गर्भे रक्षा कृता।

तथा च तत्रैव रासकाले यादृशी गोपीनां सङ्ख्या आसीत् तादृगङ्ख्यकरूपाणि धारणानि भगवता श्रीकृष्णचन्द्रेण कृतानि। एकस्मात् श्रीकृष्णात् एव असङ्ख्यककृष्णमूर्तीनां प्रादुर्भावः पूर्णेशत्वगुणैः सहाभवत्। विषयेऽस्मिन् श्रुतेः वचनं यथा प्राप्नोति

**पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥**[16]

**वशित्वसिद्धिः**

महात्माबुद्धेन 'अङ्गुलिमालः' इत्याख्यो दुष्टमानवो स्ववशित्व-सिद्धिद्वारा स्ववशे कृतः। तथा च श्रीमद्भागवतमहापुराणस्यानुसारं भगवता श्रीकृष्णेन कृष्णसर्पो वशीकृतः। रासलीलाकालेऽपि भगवता श्रीकृष्णचन्द्रेण वंशीध्वनिना सम्पूर्णगोपकन्याः स्ववशीभूताः कृताः। एतानि सर्वाण्युदाहरणानि वशित्वसिद्धेरेव परिचायकानि सन्ति। भगवद्बलभद्रेणापि देहपरायणकाले समुद्रतटे उपविश्य एकाग्र-चित्तसा परमात्मनः चिन्तनं कुर्वन् स्वात्मानमात्मस्वरूपे एव स्थिरीकृत्य मानवशरीरस्य परित्यागः कृतः[17] इति।

सिद्धिरियं प्रायशः ईश्वरे विद्यते। तथापि श्रेष्ठमहर्षिमुनीत्या-दीष्वपि कठिनसाधनाबलेनैव प्राप्तुं शक्नुवन्ति। सर्वव्यापकभग-वच्छ्रीकृष्णेन ब्रह्माणं स्वविभूतिस्वरूपदेवतांश्च दृष्ट्वा स्वात्मस्वरूपे स्थिरीकृत्य पद्मनेत्रयोः पिदानमकरोत्[18]। विषयेऽस्मिन् यथोक्तम्

**भगवान् पितामहं वीक्ष्य विभूतीरात्मनो विभुः।**
**संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत्॥**[19]

योगिभिः सदृशमग्निदेवतासम्बद्धयोगधारणाद्वारा स्वशरीरमग्नौ नैव समर्पितः, अपितु सशरीरस्वधामं प्रत्यगच्छत्[20]। सशरीरस्वधामं प्रत्यगमनम्, मृत्युं स्ववशीकरणं भगवच्छ्रीकृष्णस्य दैवत्वशक्ति-सम्पन्नत्वेनैव वशित्वसिद्धेरेव परिचायकोऽस्ति। यथोक्तम्

**लोकाभिरामां स्वतनुं धारणाध्यानमङ्गलम्।**
**योगधारणयाऽऽग्नेय्यादग्ध्वा धामाविशत् स्वकम्॥**[21]

एतादृश्याः सिद्धेः प्रसङ्गे एका अन्या कथा प्राप्नोति। महाराजसगरस्य षष्ठीसहस्रपुत्राणां मुक्त्यर्थं चतुर्नृपैः भगवच्छिव-स्यानुकम्पया धराधामोपरि आनीतुं समर्थाः अभवन्। तदा धाराप्रवाहात्क्रोधीभूतेन 'जन्हुः' इत्याख्यर्षिणा सम्पूर्णगङ्गायाः पानमकरोत्। यथा

**भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः।**
**तस्य जह्वः सुतो गङ्गां गण्डूषीकृत्य योऽपिबत्॥**[22]

**कामावसायित्वसिद्धिः**

अत्र कामावसायित्वस्यार्थः 'प्रत्येकसङ्कल्पस्य पूर्णतायाः सत्याः सामर्थ्यमिति वर्तते' इति। सिद्धिनानया योगीजनानां सङ्कल्पा-नुसारमेव पदार्थानां प्राप्तिर्भवति अर्थात् योगीजनाः यस्य वस्तुनः इच्छा मनसि विद्यते तस्य वस्तुनः प्राप्तिः सङ्कल्पमात्रेणैव कर्तुं समर्था भवन्तीति । ते विषमपि अमृततुल्यं कर्तुं समर्था भवन्ति । ते योगीजनाः यदि सङ्कल्पः कुर्याच्चेत्तदा अमृतं विषतुल्यं कर्तुमपि समर्था भवितुमर्हन्ति ।

अस्याः सिद्धेः उदाहरणं श्रीवेदव्यासद्वारा वर्णितयोः श्रीमद्भागवत-महापुराणमहाभारतयोरपि प्राप्यते। यदा दुर्योधनादिभिः भीमसेनं प्रति प्रदत्तं विषपानानन्तरं पुनर्जीवनं कामावसायित्वसिद्धिद्वारैव समर्थो बभूव ।

न केवलं प्राचीनग्रन्थेष्वपितु आधुनिकभारतेऽपि एतादृशः प्रसङ्गः प्राप्नोति । भगवच्छ्रीकृष्णचन्द्रस्य 'मीराबाई' इत्याख्यां महद्भक्तां तस्याः सम्बन्धितबन्धुबान्धवादिभिः विषं प्रदाय तां हन्तुं मारणस्य वा प्रयासः कृतः, परञ्च ते भगवल्लीलया वशीभूताः ते तां नैव हन्तुं समर्थाः शक्नुयुः। यतो हि भगवत इच्छानुसारं विषस्य स्वभावपरिवर्तनपूर्वकममृततुल्यं भूत्वा मीरां प्राणदाता अभवत्। परिणाममिदं 'कामावसायित्वसिद्धेः' परिचायकमासीत्।

**निष्कर्षः**

अग्निमहापुराणे अष्टसिद्धीनां चर्चा विहिता वर्तते। तत्र हि श्रीमद्भागवतमहापुराणं पञ्चमवेदरूपेण परिगण्यते। अनयोः महापुराणयोः अष्टसिद्धीनां विवेचनेन सञ्ज्ञायते यत् यस्य साधकस्य पार्श्वे एतादृशानां सिद्धीनां सङ्ग्रहो भविष्यति, तस्य पार्श्वे अद्भुतशक्तीनामपि सङ्ग्रहो भविष्यति । साधनया योगबलेन वा साधको योगी वा उड्डयनं कर्तुम्, आकारपरिवर्तनं कर्तुम्, असम्भवकार्यं सम्भवं कर्तुं समर्थो भवति । यद्यपि एतादृशानां सिद्धीनां सङ्ख्या विविधशास्त्रेषु इतोऽपि अधिका भवितुमर्हति, अर्थात् अष्टसिद्धिभिः साकमन्यगौणसिद्धयः अपि विराजन्ते । परञ्च विविधमहापुराणेषु ग्रन्थेषु चाष्टसिद्धीनां चर्चा तु विद्यत एव, यथा आदिमहाकाव्ये रामायणे भगवतः श्रीहनुमतः पार्श्वे अष्टसिद्धीनां नवनिधीनां प्रसङ्ग आयाति। तथैव महाभारते श्रीवेदव्यासस्य पार्श्वे दिव्यदृष्टेः तथा भीमसेनपुत्रस्य घटोत्कचस्य पार्श्वे अणिमामहिमासिद्ध्योः प्रसङ्गो विराजते। एतादृशानि अनेकोदाहराणानि सम्प्राप्नुवन्ति विभिन्न-शास्त्रेष्विति ।

आधुनिककालेऽपि एतादृशाः अनेके विभूतयो विद्यन्ते, येषां पार्श्वे एतादृक्सिद्धीनां सङ्ग्रहो विद्यते। परञ्च तेषु केचन् तादृशाः जनाः समाजाद् बहुदूरे निवसन्ति अर्थात्सामान्यजनेषु ते निवासो नैव कुर्वन्ति, यथा हिमालयस्थाः अनेके ऋषयः । ते सदैव भगवत्प्राप्तये निरन्तररूपेण निरताः सन्ति। क्रमेऽस्मिन् बागेश्वरधामस्य सिद्धपुरुषः आचार्यधीरेन्द्रशास्त्री, तेषां पूज्यगुरुवरीयाः परमहंसो रामभद्रा-चार्यमहाभागाः इत्यादयः। अतः सिद्ध्यति यत् यदि वयमपि आधुनिककाले श्रेष्ठगुरोः संरक्षणे एतादृशानां सिद्धीनां प्राप्तये प्रयासः कुर्मः चेत्तदा निश्चितरूपेण अस्माकं पार्श्वेऽपि एतादृशाः सिद्धयो भवितुमर्हन्ति, नास्त्यत्र कोऽपि सन्देह इति विदुषां निगूढाशय इति ।

**सन्दर्भग्रन्थसूची**

1. श्रीमद्भागवमहापुराणम् (संस्कृतम्), श्रीवेदव्यासः, गीताप्रेस-गोरखपुरः २७३००५, चतुस्त्रिंशत्तमं संस्करणम्, संवत् २०६७
2. श्रीमद्भागवतमहापुराणम् (हिन्द्याम्), श्रीवेदव्यासः, गीताप्रेस-गोरखपुरः २७३००५, चतुःपञ्चाशत्तमं संस्करणम्, संवत् २०६२
3. अग्निमहापुराणम्, श्रीव्यासः, गीताप्रेसगोरखपुरः २७३००५, चत्वारिंशत्तमं संस्करणम्, सन् १९७२
4. श्रीमद्भगवद्गीता, श्रीवेदव्यासः, गीताप्रेसगोरखपुरः २७३००५, त्रयस्त्रिंशत्तमं संस्करणम्, संवत् २०६१

**पाद टिप्पणी**

[1] मार्कण्डेयमहापुराणम्, अध्याय ४०.२९-३३
[2] ब्रह्मवैवर्तमहापुराणम्, प्रकृतिखण्डम्, ११३.८५
[3] श्रीमद्भागवतमहापुराणम्, १०.३.४६
[4] श्रीमद्भागवतमहापुराणम्, १०.३.४३
[5] अग्निमहापुराणम्, २/९
[6] वा०रा०सु० का १/१४९/१५५
[7] श्रीमद्भागवतमहापुराणम्, ८/२०/२१
[8] श्रीमद्भागवतमहापुराणम्, ८/२१/३१
[9] श्रीमद्भागवतमहापुराणम्, ९/१५/१८
[10] ऋग्वेदः, १०.९०.०४
[11] ऋग्वेद १०.१३६.२
[12] योगसूत्रम्, ३.४२
[13] व्या० भा० ३.४२
[14] श्रीमद्भागवतमहापुराणम्, ३/२३/१२
[15] श्रीमद्भागवतमहापुराणम्, ८/८/४२
[16] वृहदारण्यकोपनिषद्, उत्तरार्द्धम्, १.१
[17] श्रीमद्भागवतमहापुराणम्, ११/३०/२६
[18] श्रीमद्भागवतमहापुराणम्, ११/३१/५
[19] श्रीमद्भागवतमहापुराणम्, ११/३१/५
[20] श्रीमद्भागवतमहापुराणम्, ११/३१/६
[21] श्रीमद्भागवतमहापुराणम्, ११/३१/६
[22] श्रीमद्भागवतमहापुराणम्, ९/१५/३